# भारतीय-
# सौन्दर्यशास्त्रावतारः

'भारतीय सौन्दर्यशास्त्र की भूमिका' इति ग्रन्थस्य संस्कृतानुवादः


मूललेखकः

डा. नगेन्द्रः

प्रधानसम्पादकः

डा० मण्डनमिश्रः

निदेशकः

अनुवादकः

कविरत्नम् अमीरचन्द्र शास्त्री साहित्याचार्यः

(राष्ट्रपतिसम्मानित आचार्यः)



राष्ट्रियसंस्कृतसंस्थानम्

नई दिल्ली—२७

# भारतीयसौन्दर्यशास्त्रावतारः

## अनुक्रमः


मङ्गलाचरणम् १
ग्रन्थावतरणिका २

अध्यायः प्रथमः (सौन्दर्यशास्त्रम्) ३

सौन्दर्यशास्त्रपदार्थः ४
सौन्दर्यशास्त्रस्य स्वतन्त्रमस्तित्वम् ५
सौन्दर्यशास्त्रस्याङ्गानि, विवेचनीयो विषयः,
मूलसमस्याश्च १९
परिकरश्लोकाः २४

अध्यायो द्वितीयः (सौन्दर्यस्य परिभाषा स्वरूपञ्च) २६

अध्यायावतरणिका
पाश्चात्यावधारणा
वस्तुवादिनी व्याख्या २९
भाववादिनी व्याख्या ३०
सौन्दर्यं वस्तुनिष्ठं व्यक्तिनिष्ठं वा ? ३१
सौन्दर्यस्य रूपाकृतिः ३३
सौन्दर्यदृष्टिः ३३
निष्कर्षः ३६
परिकरश्लोकाः ३७

मनेकैः कविभिर्योगो दत्तः । रचनाक्रमश्चास्याः शताब्दीर्यावच्चलितः, इत्यसन्दिग्धम् । एतादृश्यां स्थितौ मूलमहाभारतस्वरूपस्य, तेनैवानुपातेन च तदीयविभिन्नांशरचनाकालस्य वा निर्णयो दुष्करो जातः । अतोऽस्माकं समक्षमेक एव विकल्पस्तिष्ठति । स चायं यत्सामान्यतयोपलब्धस्थ संस्करण-स्याश्रयेणैव स्वकार्यं सम्पादयेम । रामायणतुलनायां महाभारते काव्य-तत्त्वापेक्षयेतिहासतत्त्वस्य तेनैवानुपातेन च सौन्दर्यवर्णनाद् वृत्तवर्णनस्य प्राधान्यं भवति । विवेचनपक्षश्चास्य रामायणापेक्षयातिप्रौढोऽधिकपुष्ट-श्चास्ति । किन्तु विवेचनीया विषयास्तावदिह धर्मराजनीतिसदाचारादय एव सन्ति, न सौन्दर्यं नापि कला ।

महाभारते सुन्दरार्थे रम्यरुचिरसुरूपहृद्यचारुकान्तप्रियदर्शनशोभन-मनोरममनोज्ञसुभगादयस्ते सर्वेऽपि पर्याया मुक्तया प्रयुक्ताः सन्ति, ये रामायणे प्राप्यन्ते—

१. रूपवान् दर्शनीयश्च (उद्योगपर्व ९८.१२)

२. तत्त्वमाख्याहि शोभने (वनपर्व १२३.३)

३. कर्णिकारवनं रम्यम् । (भीष्मपर्व ९-२४)

४. कान्तश्च प्रियश्च स्थिरसङ्गरः (वनपर्व ४५-१२)

५. मनोज्ञे काननवरे (वनपर्व १४५-४५)

६. रुचिरस्ते वरो भवेत् (उद्योगपर्व १००-१६)

७. कौतूहलाद् विस्मितचारुनेत्र । (११-३)

८. उवाच वाक्यं मधुराभिधानं मनोहरं चन्द्रमुखी प्रसन्ना । (अनु-पर्व-११-१२)

९. सत्यासु भिन्नं प्रियदर्शनासु सौभाग्ययुक्तासु गुणान्वितासु । (अनु-पर्व-११-१३)

१०. सुभगो वर्णनीयश्च…(अनु० पर्व ११०-१०)